# राष्ट्रियसंस्कृतसंस्थानम्

## आचार्यः द्वितीयवर्षम् (वेदः) चतुर्थसत्रार्द्धः

## तृतीयपत्रम्

**जैमिनीयन्यायमालायाः 3-4 अध्यायौ,**

**पिङ्गलविरचितं छन्दःशास्त्रं 1-2 अध्यायौ**


पाठ्यसामग्रीसङ्कलनम्

**डॉ. दे. दयानाथः**

सहायकाचार्यः, वेदविभागः, राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ परिसरः

दूरवाणी – 9419295841 ईमेल – sridayanath@gmail.com

# छात्रेभ्यः निर्देशाः

**प्रिय छात्राः !**

आचार्यचतुर्थसत्रार्द्धे तृतीयपत्रे भवतां स्वागतम् । पाठ्यक्रमेऽस्मिन् श्रीमन्माधवाचार्यप्रणीताया जैमिनीयन्यायमालायाः तृतीय-चतुर्थाध्यायौ, अपिच पिङ्गलाचार्यविरचिते छन्दःसूत्रग्रन्थे प्रथम-द्वितीयाध्यायौ च निर्दिष्टौ स्तः।

यद्यपि भवन्तः ग्रन्थद्वयस्यास्याध्ययनं स्वस्वकक्षासु यथाविधि यथासम्भवं च कृतवन्तः स्युरिति विश्वासः । तथाप्यधुना परिस्थितिरकूला न वर्तते स्वकक्षायामुपस्थातुमिति धियाऽत्र पाठ्यक्रमे निर्दिष्टग्रन्थेभ्यः कतिपयानां मुख्यबिदूनामुल्लेखः कृतः । स्वकक्षासु पूर्वमधीतविषयत्वेऽपि परीक्षासन्नाहदृष्ट्या इमानि बिन्दून्यध्येतव्यानीति अत्र प्रदत्तानि वर्तन्ते।

अतः भवन्तः विषयानिमान् मनसि सन्धार्य स्वाध्यायरताः भवन्तु अपि च संशयोत्पन्ने सति स्वगुरुभिः साकं सम्पर्कं विधाय छिन्नसंशयाः भवन्तु इति निर्देशः।

- जैमिनीयन्यायमालायाः प्रणेता श्रीमाधवाचार्यः अस्ति ।
- अस्मिन् ग्रन्थे द्वादशाध्यायाः सन्ति ।
- ग्रन्थेऽस्मिन् 1000 मीमांसान्यायानां संग्रहः विद्यते ।
- श्रीमाधवाचार्यः कर्णाटकदेशनिवासी आसीत् ।
- अस्य सायण-भोगनाथौ इति द्वौ भ्रातरौ आस्ताम् ।
- अस्य गुरुः श्रीविद्यातीर्थस्वामी अभवत् ।
- अस्य पितुः नाम श्रीमायण इति मातुः नाम श्रीमती आसीत् ।
- जैमिनीयन्यायमालायाः तृतीयाध्याये अष्टौ पादाः सन्ति ।
- जैमिनीयन्यायमालायाः चतुर्थाध्याये चत्वारः पादाः सन्ति ।

# जैमिनीयन्यायमालायाः मङ्गलश्लोकः

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युः तं नमामि गजाननम् ॥

ब्रह्मादिदेवाः यं भगवन्तं सर्वकार्यारम्भेषु नमस्कृत्य कृतकृत्याः स्युः तं देवं गजाननापरनामकं गणेशम् (अहं) नमामि ।

## ‘अभिक्रामं जुहोति’ इति वाक्येन विहितं प्रयाजकर्तुः आहवनीयाग्निसंचरणप्रतिपादनम् ।

अभिक्रामं जुहोतीति युक्तं कर्त्राखिलस्य यत् । किंवा प्रयाजमात्रस्य कृत्स्नकर्तृयुतं भवेत् ॥
प्रयाजाभिक्रमणयोः क्रियात्वादुभयोरपि । मिथस्सम्बन्धराहित्यात्, मैवं तेऽपि समत्वतः ॥
कर्तृदोषाददोषश्चेत् समानेयं समाहितिः । ततः प्रयाजसान्निध्यात् कर्त्रैवास्य संयुतिः ॥

**(जै.न्या.माला 3.1. अभिक्रमणाधिकरणम्)**

**दर्शपूर्णमासयोः**—प्रयाजसमीपे श्रूयते—(१)“अभिक्रामं जुहोति” इति । तत्र होमकाले यदेतदाहवनीयमभितः संचरणम्, तत्कृत्स्नदर्शपूर्णमासकर्त्रा सम्बध्यते; न तु प्रयाजमात्रकर्त्रा । कुतः ? अभिक्रमणस्य क्रियारूपस्य कारकत्वाभावेन प्रयाजक्रियया सम्बन्धासम्भवादिति **चेत्**—

**मैवम्** ; क्रियारूपत्वादेव दर्शपूर्णमासक्रिययाऽपि सम्बन्धासम्भवात् । अथोच्येत—अभिक्रमणं कर्तृकारकेण साक्षात्सम्बध्यते, तद्द्वारा कृत्स्नदर्शपूर्णमासकर्मणा सम्बध्यत इति । तदेतत्समाधानं प्रयाजसंबन्धेऽपि समानम् । अतः सन्निधिबलात्प्रयाजकर्त्रा सम्बध्यते ॥

# ‘हस्तावववनेनिक्ते’ इति मन्त्रेण विहितस्य हस्तशोधनस्य आस्तरणमात्रमिति पूर्वपक्षस्य निराकरणम्

**हस्तौ द्वाववनेनिक्ते स्तृणात्युलपराजिकाम्। दर्भास्तरण एवाङ्गं हस्तशुद्धिरुताखिले॥**
**तन्मात्राङ्गत्वमत्र स्याद्दन्तर्यात्मकात्क्रमात्। लिङ्गप्रकरणाभ्यां तु सर्वानुष्ठानशेषता॥**

**(जै.न्या.माला 3.1. हस्तावनेजनाधिकरणम्)**

दर्शपूर्णमासप्रकरणे श्रूयते–(१)“हस्तावववनेनिक्ते,(२)“उलपराजिं स्तृणाति” इति। वेद्यमास्तरितुं संपादितस्तृणस्तम्ब उलपराजिः। तत्र हस्तशुद्धिदर्भास्तरणवाक्ययोर्नैरन्तर्येण पठितत्वात्क्रमप्रमाणेन हस्तशुद्धिरास्तरणमात्रस्याऽङ्गमिति **चेत्**—

**मैवम्**; अवनेजनं हस्तसंस्कारः। ‘संस्कृतौ च हस्तौ सर्वानुष्ठानयोग्यौ’ इत्येतादृशं सामर्थ्यं लिङ्गम्। प्रकरणं च दर्शपूर्णमासयोः स्फुटम्। अतः प्रबलाभ्यां लिङ्गप्रकरणाभ्यां क्रमबाधात्सर्वशेषो हस्तशुद्धिः।

अयं न्यायो वाग्यमेऽपि द्रष्टव्यः। स च वाग्यमो ज्योतिष्टोमप्रकरणे श्रुतः–(३) “मुष्टीकरोति” “वाचं यच्छति” इति। तदनन्तरमेवेदं श्रुतम्—“दीक्षितमावेदयति” इति। आवेदनप्रकारश्चैवं श्रुतः—अदीक्षिष्टाऽयं ब्राह्मण इति त्रिरुपांश्वाह देवेभ्य एवैनं प्राह, त्रिरुच्चैरुभयेभ्य एवैनं देवमनुष्येभ्यः प्राह” इति। अत्र मुष्टीकरणवाङ्नियमाभ्यां हस्तजिह्वागतचापले निवारिते सति मनस एकाग्रस्य सर्वकर्मसु योग्यत्वं लिङ्गम्। तेन क्रमो बाध्यते॥

# ‘बर्हिर्देवसदनं दामि’ इति मन्त्रेण मुख्यस्यैव दर्भस्य लवनक्रिया विहिता इति प्रतिपादनम्

देवोपसदनं बर्हिर्दामिगीर्मुख्यगौणयोः। तल्लिङ्गमर्थयोर्मन्त्रं नियुङ्क्ते मुख्य एव वा ॥
शब्दार्थत्वाद् द्वयोस्तत्र युज्यते विनियोजनम्। प्रथमावगतत्वेन मुख्ये तद्विनियम्यते ॥

**(जै.न्या. माला 3. 2. लिङ्गाधिकरणम्)**

(१)“बर्हिर्देवसदनं दामी”ति लवनप्रकाशको मन्त्र आम्नातः। तत्र लवन-प्रकाशनसामर्थ्यलक्षणेन लिङ्गेनाऽयं मन्त्रो लवनक्रियायां विनियुज्यते। लवितव्यं च बर्हिर्द्विविधम्—मुख्यं गौणं च। मुख्यं कुशकाशादि (२)दशविधदर्भरूपम्। गौणं तु तत्सदृशं तृणान्तरम्, तस्मिन् बर्हिश्शब्दस्य माणवकेऽग्निशब्दवद्गुणयोगेन प्रवृत्तत्वात्। तथा सति मुख्यवद्गौणस्याऽपि शब्दार्थत्वेन दर्भस्य तृणान्तरस्य च लवने मन्त्रविनियोग इति प्राप्ते——

ब्रूमः——मुख्यस्य शीघ्रप्रतीतत्वेन मुख्ये मन्त्रं विनियुज्य चरितार्थं लिङ्गं विलम्बप्रतीततया गौणप्रतीक्षां न करोति। तस्मात् मुख्यस्यैव लवने मन्त्रो नियम्यते।

**इन्द्रपीतस्य इति भक्षणमन्त्रप्रसङ्गे अमन्त्रकभक्षणमिति अथवा ऊहप्रयोग इति च द्वयोः पूर्वपक्षयोः निरासनपूर्वकं सिद्धान्तप्रतिपादनम् ।**

**इन्द्रपीतस्येति भक्षमन्त्रांशः किमिहैन्द्रके । केवलोऽन्यत्र वोहाच्च सर्वत्रोत यथाश्रुतम् ॥**
**ऐन्द्र एव समर्थत्वात्तूष्णीमेवान्यभक्षणम् । ऊहो वाऽन्येषु कर्मैक्येऽप्यस्त्यूहो भक्षभेदतः ॥**

**(जै.न्या.माला 3.2 इन्द्रपीताधिकरणम्)**

भक्षमन्त्रे कश्चिदंशः " इन्द्रपीतस्य" इत्येवंविधः श्रूयते । तत्र 'इन्द्रेण पीतस्य सोमस्य शेषं भक्षयामि' इत्यर्थो भवति । तथा सत्यस्य मन्त्रस्येन्द्रप्रदानशेषभक्षण एव समर्थत्वात्तत्रैवाऽयं मन्त्रो विनियुज्यते, न तु मैत्रावरुणादिशेषभक्षणे । तस्मादमन्त्रकमेव तद्भक्षणमित्येकः **पूर्वपक्षः** ।

'इन्द्रपीतस्य' इति पदस्याऽसमर्थत्वेऽपि 'मित्रावरुणपीतस्य' इत्येवमूहे सति सामर्थ्यं भविष्यति । ननु आग्नेययागस्य प्रकृतित्वात्तद्गतस्य (१)"अग्नये जुष्टम्" इति मन्त्रस्य विकृतौ सौर्ये चरौ "सूर्याय जुष्टम्" इत्येवमूहः क्रियते । इह तु कर्मैक्यान्नोहः इति चेत्— न ; कर्मभेद इव भक्षभेदेऽप्यूहितुं शक्यत्वात् इति द्वितीयः **पूर्वपक्षः** ।

# इन्द्रपीताधिकरणे प्रतिपादितः सिद्धान्तपक्षः

**इन्द्रेण यस्मिन् सवने सोमः पीत इतीरणात् ।**
**सवनस्थेषु सर्वेषु मन्त्रोऽनूहेन पठ्यताम् ॥**

**(जै.न्या.माला 3.2 इन्द्रपीताधिकरणम्)**

“इन्द्रपीतस्य” इत्यत्र बहुव्रीहिर्द्रष्टव्यः । तत्पुरुषत्वे (१)“समासस्य” इति सूत्रेणान्तोदात्तत्वप्रसङ्गात् । आद्युदात्तं ह्येतत्पदमाम्नातम् । इन्द्रप्रातिपदिकं तु स्वत आद्युदात्तम् । तथा सति (२)“बहुव्रीहौ प्रकृत्या पूर्वपदम्” इति सूत्रेण पूर्वपदप्रकृतिस्वरविधानात्समस्तपदमप्याद्युदात्तमेव संपद्यते। ‘इन्द्रेण पीतः सोमो यस्मिन् सवने’ इति विग्रहात्सवनपरत्वे सति ‘ऐन्द्रभक्षण एव’ इति नियन्तुमसमर्थत्वात्सर्वभक्षणेष्वनूहेनैवाऽयं मन्त्रः प्रयोक्तव्य इति राद्धान्तः ॥

## प्रयाजादीनां दर्शपूर्णमासाङ्गत्वप्रतिपादनम्

न क्रत्वङ्गं प्रयाजादि क्रत्वङ्गं वा, न चाऽङ्गता । प्रक्रिया अमानत्वान्नैराकाङ्क्ष्येण वाक्ययोः ॥
प्रयाजादेः फलेऽपेक्षा कथंभावेऽपि च क्रतोः । तेन प्रकरणाम्नानं तस्मादङ्गागिता तयोः ॥

**(जै.न्या.माला 3.3. प्रकरणाधिकरणम्)**

सार्धपादद्वये विनियोजकत्वेनोक्तानि यानि श्रुतिलिङ्गवाक्यानि, तेभ्योऽतिरिक्तं प्रकरणनामकं किंचित्प्रमाणं न वेदे पश्यामः । न हि पदतत्सामर्थ्यान्वयैरसंसृष्टः कश्चिद्वेदभागः केनचिदाम्नायते । एकवाक्यतामापन्नो वाक्यसमूहः प्रकरणमिति चेत्— न ; वाक्ययोः सतोः पश्चादेकवाक्यताया अभावात् । न हि "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" "समिधो यजति" इत्यनयोर्वाक्ययोः परस्पराकाङ्क्षाऽस्ति, येन वाक्यैकवाक्यता कल्प्येत । तस्मात् न प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम् इति प्राप्ते—

ब्रूमः—प्रयाजादयः फलहेतवः, पुरुषप्रवृत्तिरूपत्वात्, सेवादिवत् । दर्शपूर्णमासावुपकरणैरुपकार्यौ, करणत्वात्, प्रदीपोपकृतचक्षुर्वत् । तथासति किं प्रयाजादेः फलम् ? किं वा दर्शपूर्णमासयोरुपकरणम् ? इत्याकाङ्क्षायां सम्पन्नं वाक्यैकवाक्यतारूपं प्रकरणम् । तेन च प्रयाजादीनामङ्गत्वं प्रतीयते ।

# वेदत्रयोक्तधर्माणां ऋत्विग्भिः प्रयोगकाले समाख्याबलेन सङ्गतिस्थापनम्

वेदत्रयोक्तधर्माणामृत्विग्भिः सङ्गतिस्त्रिभिः। अनियत्या नियत्या वा नियतिर्नाऽनिरूपणात्।
हौत्रत्वादिसमाख्यानं नियतेर्गमकं स्वतः। निर्बाधं चाऽन्यवत्तच्च तेनाऽत्र विनियोजकम्॥

**(जै.न्या. माला 3.3 समाख्याधिकरणम्)**

याज्यापुरोनुवाक्यापाठादयो धर्मा ऋग्वेदे प्रोक्ताः। दोहाननिर्वापादयो यजुर्वेदे। आज्यस्तोत्रपृष्ठस्तोत्रादयः सामवेदे। तत्र 'अस्यैवैते धर्माः' इति नियामकस्य दुर्निरूपत्वाद्येन केनाऽप्यृत्विजा यः कोऽपि धर्म इच्छया संगच्छते इति **चेत्**—

**मैवम्**; 'हौत्रम्, आध्वर्यवम्, औद्गात्रम्' इति समाख्यानेन नियतिर्बोध्यते। न च समाख्यानस्य बाधकं किञ्चित्पश्यामः। तस्मादबोधकत्वबाधितत्वयोरप्रामाण्यकारणयोरभावाच्छ्रुतिलिङ्गादिपञ्चकवत्प्रमाणेन समाख्यानेन धर्मा व्यवस्थाप्यन्ते॥

## शुन्धध्वं दैव्याय कर्मणे इति मन्त्रस्य सान्नाय्यपात्रशोधनशेषत्वप्रतिपादनम्

**शुन्धध्वमिति मन्त्रोऽङ्गं पौरोडाशिकशोधने । सान्नाय्यपात्रशुद्धौ वा प्रथमोऽस्तु समाख्यया ॥**
**पौरोडाश्कमित्यत्र प्रकृत्या तद्धितेन वा । सन्निध्यनुक्तितः कल्प्यः कॢप्तत्वाच्चरमः क्रमात् ॥**

**(जै.न्या. माला 3.3. स्थानप्राबल्याधिकरणम्)**

(१)"शुन्धध्वं दैव्याय कर्मणे" इत्ययं मन्त्रः 'पौरोडाशिकम्' इति याज्ञिकैः समाख्याते काण्डे पठितत्वात्समाख्यया पुरोडाशकाण्डोक्तानामुलूखलजुह्वादीनामपि शोधनेऽङ्गम् इति चेत्—

**मैवम्** ; 'पौरोडाशिकम्' इति समाख्यायां प्रकृतिः पुरोडाशमात्रमभिधत्ते, तद्धितप्रत्ययश्च काण्डम् । न चैतावता कृत्स्नपुरोडाशपात्राणां मन्त्रसंनिधिः प्रत्यक्षो भवति । किं त्वर्थापत्त्या कल्प्यते । यद्युक्तसंनिधिर्न स्यात्, तदा मन्त्रप्रतिपादकग्रन्थस्य पौरोडाशिकसमाख्या न स्यात् । न ह्यग्न्यसंनिहितानाम् "इषे त्वा" इत्यादिमन्त्राणामाग्नेयकाण्डसमाख्या भवति । संनिहितानां तु (२)"युञ्जानः प्रथमं मनः" इत्यादिमन्त्राणां भवत्येषा समाख्या । तस्मात् काण्डसमाख्यया संनिधिं परिकल्प्य तत्संनिध्यन्यथाऽनुपपत्त्या परस्पराकाङ्क्षारूपं कृत्स्नं पात्रप्रकरणं कल्पयित्वा तद्द्वारा वाक्यलिङ्गश्रुतीः कल्पयित्वा तया श्रुत्या विनियोग इति समाख्याया विप्रकर्षः । सांनाय्यपात्राणां शोधने मन्त्रसंनिधिस्तु प्रत्यक्षः । इध्माबर्हिस्सम्पादनस्य मुष्टिनिर्वापस्य चान्तरालं सान्नाय्यपात्राणां(३) देश उक्तः । मन्त्रश्चेध्माबर्हिर्निर्वापविषययोर्मन्त्रानुवाकयोर्मध्यमेऽनुवाके पठ्यते । तेन च प्रत्यक्षसंनिधिना प्रकरणादीनां चतुर्णामेव कल्पनात्संनिधिः संनिकृष्यते । तस्मात् क्रमेण समाख्यां बाधित्वा 'सांनाय्यपात्रशोधनशेषो मन्त्रः' इत्ययं चरमः पक्षोऽभ्युपेयः ॥

## रजस्वलया सह सम्भाषणनिषेधः केवलक्रत्वङ्गत्वमिति मतनिरासनम्

**न संवदेत मलवद्वाससेत्यपि पूर्ववत् ।**
**पुमर्थः स्यात्क्रतौ क्वापि संवादस्याऽप्रसक्तितः ॥**

**(जै.न्या.माला 3.4. मलवद्वासोधिकरणम्)**

**दर्शपूर्णमासप्रकरणे** श्रूयते—(२)"मलवद्वाससा न संवेदत" इति । अस्य निषेधस्य प्रकरणात्क्रत्वङ्गत्वमिति **चेत्—**

**मैवम्** ; अप्रसक्तप्रतिषेधप्रसङ्गात् । (३)"यस्य व्रत्येऽहन् पत्न्यनालम्भुका भवति, तामपरुध्य यजेत" इति रजस्वलाया निस्सारणेन क्रतौ तत्संवादस्याऽप्रसक्तिः । तस्मात् केवलपुरुषार्थस्याऽस्य प्रकरणादुत्कर्षः ॥

## अश्वप्रतिग्रहेष्टिरित्यस्य अनुष्ठानं वैदिकदाने एव इति सिद्धान्तप्रतिपादनम्

**अश्वप्रतिहेष्टिस्तु दातुरित्यभिधास्यते। दानद्वये लौकिके वा वैदिके वा भवेदियम् ॥**
**अविशेषाद् द्वयोर्यद्वा न देयः केसरीत्यतः। निषेधाल्लौकिकात्तत्र प्रायश्चित्तिरियं भवेत् ॥**
**न जलोदरहेतुत्वं प्रमितं लौकिकं क्वचित्। वैदिके तु श्रुतं तस्मात्तत्प्रायश्चित्तयेऽत्र सा ॥**

**(जै.न्या.माला. 3.4. अश्वप्रतिग्रहेष्ट्यधिकरणम्)**

**इदमाम्नायते**—"(१)यावतोऽश्वान् प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेत्" इति। तत्र 'प्रतिग्रहशब्दो दानपरः' इत्यनन्तरमेव वक्ष्यते। तत्र विशेषाश्रवणाल्लौकिकवैदिकदानयोरुभयोरप्यसाविष्टिः **इत्येकः पक्षः**।

(२) "न केसरिणो ददाति" इति स्मृत्या मित्रदायादादिभ्यः प्रीत्या क्रियमाणं लौकिकमश्वदानं निषिद्धम्। तदनुष्ठाने प्रायश्चित्तरूपेयमिष्टिरिति **द्वितीयः पक्षः**।

"वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति" इत्यश्वदाने जलोदरव्याधिरूपो दृष्टदोषो वरुणग्रहवाक्येनोच्यते। न च लौकिकस्याऽश्वदानस्य तद्धेतुत्वं प्रमितम्। वैदिकस्य तु जन्मान्तरविषयं दोषश्रवणम्। अतो वैदिकदाने सेष्टिः प्रायश्चित्तम्। अस्ति हि वैदिकमश्वदानम् (३) "वडबा दक्षिणा" इत्यादिश्रवणात् ॥

# प्रसङ्गवशात् अश्वप्रतिग्रहेष्टिविधानप्रसङ्गे समाम्नाता आख्यायिका

१. तै. सं. २. ३. १२. १. "प्रजापतिर्वरुणायाऽश्वमनयत् स स्वां देवतामार्च्छत् स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत् तन्निरवपत् ततो वै स वरुणपाशाद-मुच्यत वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुष्कपालान् निर्वपेत् वरुणमेव स्वेन भागधेयेनोपधावति स एवैनं वरुण-पाशान् मुञ्चति" इति समग्रो भागः। अस्याऽर्थः—कदाचित् प्रजापतिः वरुणायाऽश्व-मदात्, ततः स प्रजापतिः स्वां वरुणरूपां देवतां जलोदररूपेण प्राप्तवान्। दानानन्तरमेव तस्य जलोदराख्यो रोगस्समजनि इत्यर्थः। तेन परिदीर्णस्सः एतं चतुष्कपालपुरोडाशद्र-व्यकं वरुणदेवताकं यागं दृष्ट्वा तेन वरुणमयजत्, ततस्स रोगमुक्तोऽभवत्। अतश्चेदानी-मपि योऽश्वं ददाति स जलोदररोगग्रस्तो भवेत्। तत्परिहाराय यावत्संख्याकानश्वान् दद्यात् तावत्संख्याका इष्टीः कुर्यात्। तेन तृप्तो वरुण एनं तस्मान्मोचयेत् इति।

# दातुरेव अश्वप्रतिग्रहेष्टिरिति सिद्धान्तप्रतिपादनम्

यावतः प्रतिगृह्णीयादश्वांस्तावत्यः इष्टयः । प्रतिग्रहीतुर्दातुर्वा स्यादाद्योऽस्तु यथाविधि ॥
असञ्जातविरोध्यर्थवादाद्दातुः प्रजापतेः । इष्टिः श्रुता ततो दातुर्णिजर्थेऽपि विधिं नयेत् ॥

(जै.न्या.माला. 3.4. दातुरश्वप्रतिग्रहेष्ट्यधिकरणम्)

पूर्वोदाहृते वाक्ये 'प्रतिगृह्णीयात्'इति विधिपदश्रवणात्प्रतिग्रहीतुरिष्टिरिति चेत्—न; उपक्रमरूपेणाऽर्थवादेन दातुस्तदिष्टिप्रतीतेः । उपक्रमश्चैवं श्रूयते—"प्रजापतिर्वरुणायाऽश्वमनयत्, स स्वां देवतामार्च्छत्। स पर्यदीर्यत, स एतं वारुणं चतुष्कपालमपश्यत्, तं निरवपत्, ततो वै स वरुणपाशादमुच्यत" इति । अनयद्दत्तवान् । स च दाता प्रजापतिः स्वकीयां वरुणदेवतां जलोदररोगप्रदां प्राप्तवान्। तेन च रोगेण ग्रस्तः स प्रजापतिर्विदीर्णो भूत्वा रोगपरिहारायेष्टिं कृत्वा रोगादमुच्यत इत्यत्र दातुरिष्टिरित्यवगम्यते । असञ्जातविरोध्युपक्रमानुसारेण विधायकपदमपि 'प्रतिग्राहयेत्' इत्येवमन्तर्भावितणिजर्थपरतया व्याख्येयम् ॥

# सोमयागे यजमानवमने प्रायश्चित्तनिरूपणम्

ऋत्विजां वमनेऽप्येष कर्तुरेवोत वर्जनात् ।
विशेषस्याऽग्रिमो मैवं कर्तुरेव निरूपितः ॥

**(जै.न्या. माला 3.4. यजमानवमने इष्टिविधानाधिकरणम्)**

'ईदृशस्य सोमस्य वमने चरुः' इति विशेषस्याऽभावादृत्विजां यजमानस्य च वमने सर्वत्राऽसौ चरुरिति चेत्—

**मैवम्**; 'यो वमति स निर्वपति' इति निर्वप्तुर्वमनं चरुनिमित्तम् । निर्वप्ता च यजमानः । ऋत्विजो निर्वप्तृत्वेऽधिकार्यन्तरत्वप्रसङ्गात् । तस्मात् यजमानस्यैव वमने चरुविधिः ॥

# सोमयागे शेषभक्षणमस्तीति प्रतिपादनम्

**सोमेष्वभक्षो भक्षो वा न भक्षो ग्रहहोमतः ।**
**अल्पोक्तेरस्ति शेषोऽस्य भक्षोऽपूर्ववचोबलात् ॥**

**(जै.न्या.माला. 3.5 सोमे शेषभक्षाधिकरणम्)**

सोमयागेषु शेषभक्षो नाऽस्ति, "यद्ग्रहाञ्जुहोति" इति कृत्स्नग्रहेणाऽऽहुतिश्रवणात्कुम्भीष्विव शेषाभावात् इति **चेत्**—

**मैवम्**; "अल्पं जुहोति" इति विशेषवचनाच्छेषः सिध्यति । तद्भक्षणं त्वपूर्वार्थप्रतिपादकवचनेभ्योऽवगम्यते । "आश्विनं भक्षयन्ति" "द्विरैन्द्रवायवस्य भक्षयन्ति" "सदसि भक्षयन्ति" इत्यादीनि वचनान्यपूर्वार्थं प्रतिपादयन्ति । ततो भक्षविधानादस्ति सोमेषु भक्षः ।

# पवमानेष्टिः आधानस्याङ्गं नास्तीति सिद्धान्तप्रतिपादनम्

आधानं पवमानादेरिष्टेरङ्गं न वा भवेत् । अग्नीनामिष्टिशेषत्वात्तद्द्वाराऽस्य तदङ्गता ॥
अनारभ्य विधानात्तु नाऽङ्गं कस्यचिदाहितिः । अग्न्यर्थत्वात्तसमेष्टिरग्न्यस्त्वग्निहोत्रगाः ॥

**(जै.न्या.माला. 3.6. पवमानेष्ट्यधिकरणम्)**

इदमाम्नायते—(१)"अग्नये पवमानायाऽष्टाकपालं निर्वपेत्, अग्नये पावकाय, अग्नये शुचये" इति "वसन्ते ब्राह्मणोऽग्नीनाधीत" इति च । तत्र आधानं पवमानादीष्टीनामङ्गं भवेत् । कुतः ? दर्शपूर्णमासविकृतिषु पवमानादीष्टिषु चोदकप्राप्तानामाहवनीयाद्यग्नीनामिष्ट्यङ्गत्वे सत्यग्निद्वारा तत्संस्काररूपस्याऽऽधानस्यापि तदङ्गताया अनिवार्यत्वात् इति चेत्—

**मैवम्**; न ह्येतदाधानं कस्यचित्क्रतोः प्रकरणे पठितम् । किंतु अनारभ्याधीतम् । अतो न कस्याप्येतदङ्गम्, किंत्वाधानवदिष्टीनामप्यग्निसंस्कारार्थत्वात्परस्परं नाऽस्त्यङ्गाङ्गिभावशङ्का । ननु पवमानेष्ट्यङ्गत्वाभावेऽग्निसंस्कारवैयर्थ्यादग्निद्वारा तदङ्गत्वं युक्तमिति चेत्—न; संस्कृतानामग्नीनामग्निहोत्राद्युत्तरक्रतुषु तत्तद्वाक्यैर्विनियोगावगमात् । तस्मात् नाऽऽधानमङ्गम् ।

# पूतीकायामपि सोमवत् धर्मानुष्ठानकथनम्

**पूतीकाभिषवोऽतुल्यस्तुल्यो वा सोमतुल्यता ।**
**नाऽस्ति नैमित्तिकत्वेन तुल्यः प्रतिनिधित्वतः ॥**

**(जै.न्या.माला 3.6 प्रतिनिधिषु मुख्यधर्मानुष्ठानाधिकरणम्)**

(२)"यदि सोमं न विन्देत, पूतिकानभिषुणुयात्" इति श्रूयते । तत्र सोमाभावं निमित्तीकृत्य पूतीकलताखण्डानां विहितत्वात्फलचमसवन्नैमित्तिकत्वेन सोमाभिषवक्रयादिविधिः पूतीकेषु न तुल्य **इति चेत्**—

**नैवम्** ; नीवारवत्प्रतिनिधित्वात् । ननु प्रतिनिधित्वे स्वयमेवोपादित्सितत्वाद्विधिर्नापेक्षितः । अत एव नीवारेषु विधिर्न श्रुतः इति चेत्—न; विधेर्नियमार्थत्वस्य(३) षष्ठे वक्ष्यमाणत्वात् । तस्मात् अभिषवक्रयादिविधिः सोमपूतीकयोस्तुल्यः ॥

## टिप्पणी

पूतीकाः सोमलतासदृशाः लताविशेषाः । सोमाभावे तत्प्रतिनिधित्वेन पूतीकानानीय यागं निर्वर्तव्यमिति प्रयोगः ।

## यजमाने एव साप्तदश्यं युक्तमिति प्रतिपादनम्

**सदस्ये यजमाने वा साप्तदश्यं वृतत्वतः ।**
**सदस्ये कुरुते किञ्चिन्नाऽसौ स्वामिनि तत्त्वतः ॥**

**(जै.न्या.माला 3.7 यजमानसप्तदशत्वाधिकरणम्)**

*अध्वर्युब्रह्मादिषु षोडशसु व्यवस्थितेषु सप्तदशसंख्यापूरकः कश्चिदृत्विगपेक्षितः। सोऽत्र सदस्यो भविष्यति। सदस्यवस्थितः सदस्यः। न च तस्य वरणाभावः, केषांचिच्छाखायां तद्वरणस्याऽऽम्नातत्वात्। ततः साप्तदश्यं सदस्ये पर्यवसितम् इति चेत्—

मैवम् ; असौ सदस्यः किंचिदपि न करोति 'सदस्य इ' कुर्यात्' इति विध्यभावात्। न च विना क्रियामृतुयजननिमित्त ऋत्विक्शब्दस्तस्मिन्नवकल्पते। यजमानस्तु त्यागं करोतीति तस्मिन्नुपपद्यते। तस्मात्साप्तदश्यं यजमाने युक्तम् ॥

# श्रौतयागेषु ऋत्विजां चत्वारः वर्गाः

| **होतृगणः (ऋग्वेद)** | **अध्वर्युगणः (यजुर्वेद)** | **उद्गातृगणः (सामवेद)** | **ब्रह्मगणः (अथर्ववेद)** |
|---|---|---|---|
| होता | अध्वर्युः | उद्गाता | ब्रह्मा |
| मैत्रावरुणः | प्रतिप्रस्थाता | प्रस्तोता | ब्राह्मणाच्छंसी |
| अच्छावाकः | नेष्टा | प्रतिहर्ता | आग्नीध्रः |
| ग्रावस्तुत् | उन्नेता | सुब्रह्मण्यः | पोता |
| **इति आहत्य षोडश (16) ऋत्विजः यजमानसहिताः सप्तदशसंख्याका (17) भवन्ति ।** | | | |

## ममाग्ने वर्चो इति अध्वर्युणा पठ्यमानमन्त्रे श्रूयमाणं फलं यजमानस्यैव इति निरूपणम्

**ममाग्न इति कस्यात्र फलं लिङ्गेन वक्तृगम् ।**
**श्रुत्या स्वामिनि न क्रीते लिङ्गं तत्रोपचर्यताम् ॥**

**(जै.न्या.माला 3.8. करणमन्त्रप्रकाश्यफलस्य याजमानताधिकरणम्)**

(१)"ममाऽग्ने वर्चो विहवेष्वस्तु" इत्ययमाहवनीयस्याऽन्वाधाने करणभूतो मन्त्रोऽध्वर्युणा पठ्यते । 'विशिष्टं हवनं येषां यज्ञानां ते विहवास्तेषु वर्चस्तेजसोपलक्षितं यत्फलं तन्ममाऽस्तु' इत्यनेन लिङ्गेन मन्त्रमुच्चारयितुरध्वर्योस्तत्फलम् इति चेत्—

**मैवम्** ; "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यात्मनेपदश्रुत्या साङ्गप्रधानफलस्य यजमानगामित्वं प्रतीयते । न च परिक्रीतस्याऽध्वर्योर्दक्षिणातिरिक्तफलसम्बन्धो न्याय्यः । तस्मात् श्रुतिन्यायाभ्यां विरुद्धं तल्लिङ्गं यजमानपरत्वेनोपचरणीयम् । 'मदीययजमानस्य तद्वर्चोऽस्तु' इति ह्युपचारः । तस्मात् यजमानेन पाठ्येषु "आयुर्दा अग्नेऽस्यायुर्मे देहि" इत्यादिषु क्रियमाणानुवादिषु (२)प्रत्यगाशीर्मन्त्रेषु श्रुतं फलं यथा याजमानम् , तथैवाऽध्वर्युणा पाठ्येषु करणमन्त्रेषु श्रुतमपि फलं याजमानमेव ॥

# यज्ञायुधानां हविष्ट्वनिरासनं तेषां यज्ञसाधनत्वनिरूपणं च

दश यज्ञायुधानीति हविष्ट्वेन विधिर्न वा। आद्योऽप्राप्तेः पुरोडाशे समुच्चयविकल्पने ॥
सार्धमुत्पत्तिशिष्टेन विकल्पादिर्न युज्यते। स्फ्येनोद्धन्तीति यत्प्राप्तं तदत्रानूद्य संस्तवः ॥
(जै.न्या. माला. 4.1. चतुर्थाधिकरणम्)

दर्शपूर्णमासयोः स्फ्यश्च कपालानि चेत्याद्यनुक्रम्यैतानि वै दश यज्ञायुधानीत्याम्नातम्। तानि चात्र हविष्ट्वेन विधीयन्ते। कुतः। मानान्तराप्राप्तत्वेनापूर्वार्थत्वात्। यदि तत्र पुरोडाशो हविर्भवेत्। तदा तेन सहैतेषां समुच्चयो विकल्पो वास्त्विति प्राप्ते ब्रूमः॥ आग्नेयोऽष्टाकपाल इत्युत्पत्तिशिष्टेन पुरोडाशेन सह पश्चाच्छिष्टानामायुधानां विकल्पः समुच्चयो वा न संभवति। आयुधत्वं यज्ञसाधनत्वम्। तच्च स्फ्येनोद्धन्ति कपालेषु श्रपयतीत्यादि शास्त्रसिद्धमेवानूद्य यज्ञायुधानि संभरन्तीत्येष संभरणविधिः स्तूयते। तस्मान्नास्ति हविष्ट्वम् ॥

# दर्शपूर्णमासेष्टौ ‘यत्प्राचीमाहरेत्’ इति वाक्यार्थनिर्णयः

प्राचीमाहरतीत्यत्र दिक्शाखा वाऽस्तु दिक्श्रुतेः ।
आहार्यत्वं दिशो नास्ति शाखा तेनोपलक्ष्यते ॥

**(जै.न्या. माला. 4.2. तृतीयाधिकरणम्)**

दर्शपूर्णमासयोर्यत्पलाशशाखया वत्सानपाकरोतीति पलाशशाखां प्रकृत्य श्रूयते । यत्प्राचीमाहरेद्देवलोकमभिजयेदिति । तत्र प्राचीशब्दस्य दिग्वाचित्वाद्दिगाहरणं द्वितीयया विधीयत इति चेत् ॥ नैवम् । अशक्यत्वात् । ततो वृक्षस्य प्राची शाखाचोपलक्ष्यते । तथा सति प्रकृतानुग्रहो भवति ॥

## पिण्डपितृयज्ञस्य क्रत्वङ्गत्वमतखण्डनम्

**क्रत्वङ्गं स्यान्न वा पिण्डपितृयज्ञः क्रतौ हि सः ।**
**अमावास्योक्तितो मैवं तत्कालोक्तेः पुमर्थता ॥**

**(जै.न्या.माला. 4.4. अष्टमाधिकरणम्)**

एवमाम्नायते । अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीति । तत्रामावास्याशब्दवाच्ये कर्मणि विधीयमानत्वादयं पिण्डपितृयज्ञः क्रत्वङ्गमिति चेत् ॥ मैवम् । अमावास्याशब्दस्य कालवाचित्वात् । कर्मणि त्वयं शब्दो लाक्षणिकः । न च वाक्येन क्रत्वङ्गत्वाभावेऽपि प्रकरणेन तदङ्गत्वेदिति वाच्यम् । तस्यानारभ्याधीतत्वात् । तस्मादयं पुरुषार्थः ॥

•छन्दःसूत्रस्य प्रणेता पिङ्गलाचार्यः ।

•अस्मिन् ग्रन्थे अष्टौ अध्यायाः सन्ति ।

•मृतसञ्जीवनी इति वृत्तिः छन्दःसूत्रस्य प्रसिद्धा वर्तते ।

•मृतसञ्जीवनी इति वृत्तेः प्रणेता हलायुधभट्टः ।

•पिङ्गलविरचिते छन्दःशास्त्रे काश्यपः, क्रौष्टुकिः, ताण्डी, सैतवः इत्याद्याचार्याणां नामानि उद्धृतानि सन्ति ।

•प्रथमाध्यायस्य प्रथमं सूत्रं – धीश्रीस्त्री-म् इति ।

•प्रथमाध्याये पञ्चदश सूत्राणि सन्ति ।

•द्वितीयाध्याये षोडश सूत्राणि सन्ति ।

•द्वितीयाध्यायस्य प्रथमं सूत्रं छन्दः इति ।

# शास्त्रारम्भः (छन्दःशास्त्रम्)

इह हि त्रैवर्णिकानां साङ्गवेदाध्ययनमाम्नायते । अर्थावबोधपर्यन्तश्चाध्ययनविधिः । वेदाङ्गं च छन्दः । ततस्तदध्ययनविधित्वात्तदनुष्ठेयम् । अथ 'त्रिष्टुभा यजति, बृहत्या गायति, गायत्र्या स्तौति' इत्येवमादिश्रवणात् अर्थायातमनुष्टुभादिज्ञानम् । किं च छन्दसामपरिज्ञानात्प्रत्युत प्रत्यवायः श्रूयते । यथा—'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यते वा म्रियते पापीयान् भवति । यातयामान्यस्य छन्दांसि भवन्ति ।' ( छं. ब्रा. ३।७।५ ) तस्माच्छन्दोज्ञानं कर्तव्यं, तदर्थमिदं शास्त्रमारभ्यते । तथा लघुनोपायेन शास्त्रावबोधसिद्ध्यर्थं संज्ञाः परिभाषते सूत्रकारः—

# प्रथमसूत्रव्याख्यानम्

## धीश्रीस्त्री म् 1.1

धीश्रीस्त्री इत्यनेन गुरुत्रयं संज्ञित्वेनोपलक्षयति, मकारश्च संज्ञात्वेन । ततश्चायमर्थः-सर्वगुरोस्त्रिकस्य (ऽऽऽ) 'म' इति संज्ञा परिभाष्यते । ध्यादीनामुपादानप्रयोजनमुपरिष्टाद्वक्ष्यामः । मप्रदेशाः 'विद्युन्माला मौ गौ' ( पि०सू० ६।६ ) इत्येवमादयः ॥

# छन्दसाम् अक्षरसंख्यापरिज्ञानचक्रम्

| छन्दः | गायत्री | उष्णिक् | अनुष्टुप् | बृहती | पङ्क्तिः | त्रिष्टुप् | जगती |
|---|---|---|---|---|---|---|---|
| आर्षी | 24 | 28 | 32 | 36 | 40 | 44 | 48 |
| दैवी | 01 | 02 | 03 | 04 | 05 | 06 | 07 |
| आसुरी | 15 | 14 | 13 | 12 | 11 | 10 | 09 |
| प्राजापत्या | 08 | 12 | 16 | 20 | 24 | 28 | 32 |
| याजुषी | 06 | 07 | 08 | 09 | 10 | 11 | 12 |
| साम्नी | 12 | 14 | 16 | 18 | 20 | 22 | 24 |
| आर्ची | 18 | 21 | 24 | 27 | 30 | 33 | 36 |
| ब्राह्मी | 36 | 42 | 48 | 54 | 60 | 66 | 72 |

**प्रिय छात्राः!**

**अत्र निर्दिष्टमुख्यबिन्दूनाम् अध्ययनेन सह अधोलिखिताः विषया अपि विशिष्य अध्येतव्याः –**

- **मीमांसाशास्त्रस्य इतिहासः महत्त्वं च**
- **वेदाङ्गानां संक्षिप्तपरिचयः महत्त्वं च**
- **श्रीमन्माधवाचार्यस्य जीवनवृत्तम्**
- **मीमांसाशास्त्रदृष्ट्या वेदापौरुषेयत्वप्रतिपादनम्**
- **प्रसिद्धानां मीमांसकानां परिचयः**